हयग्रीवध्यानप्रकरणम्

सदा तव ध्येयतया हृदब्जे स्थितमच्युतम् ।
चिद्रूपभद्रावयवं चित्रभूषणभूषितम् ॥ १॥

सश्रीकं सपरीवारं सर्वज्ञं सर्वसाक्षिणम् ।
आवाह्य प्रतिमामध्ये ध्यायस्व नृतुरङ्गमम् ॥ २॥

करस्थमुद्राशङ्खाक्षपुस्तकं रम्यहस्तकम् ।
चन्द्राभं चन्द्रबिम्बस्थं चन्दनोक्षितवक्षसम् ॥ ३॥

चारुप्रसन्नवदनं चलत्कुन्तलसन्ततिम् ।
सुकर्णगण्डभ्रूयुग्मं सुनासोष्ठं शुचिस्मितम् ॥ ४॥

सुधारसार्द्रसर्वाङ्गं शोकमोचनलोचनम् ।
श्रीवत्सकौस्तुभधरं श्रितभक्तधुरन्धरम् ॥ ५॥

वनमालावैजयन्तीकन्धरं लोकसुन्दरम् ।
कृशमध्यं विशालोरःस्थलं पीनचतुर्भुजम् ॥ ६॥

दुष्टानिष्टदशिष्टेष्टपुष्टबाहुचतुष्टयम् ।
वृत्तदीर्घचतुर्हस्तैः श्रुत्यर्थचतुरर्थदम् ॥ ७॥

कराख्याम्भोजसम्भूतदलोपमशुभाङ्गुलम् ।
अश्वग्रीवं दृष्यपार्श्वं लक्ष्यकक्ष्यस्तनद्वयम् ॥ ८॥

मनोज्ञपृष्ठप्रभया तृणीकृतशशिद्युतिम् ।

तनूदरं निम्ननाभिं मनोहरवलित्रयम् ॥ ९ ॥

लसद्रोमलताभासा वशीकृतरमादृशम् ।
बृहत्कटितटद्वन्द्वमप्रतिद्वन्द्वमव्ययम् ॥ १० ॥

वर्तुलोरुं वृत्तजानुजङ्घाङ्गुलिनखावलिम् ।
अतिरक्तांघ्रियुगलतनुकोमलपल्लवम् ॥ ११ ॥

ध्वजवज्रपताकाब्जाङ्कुशरेखाभिरञ्चितम् ।
रक्तास्याब्जं रक्तपद्मसमश्रीमत्पदद्वयम् ॥ १२ ॥

चतुर्हस्तारुणतलं चतुर्वेदप्रवर्तकम् ।
चतूरूपश्रिया जुष्टं चतुर्वर्णाश्रमप्रियम् ॥ १३ ॥

चतुर्मूर्तिधरं चित्रं चतुर्युगनियामकम् ।
चतुर्विधानां मुक्तानां चतुर्विधसुखप्रदम् ॥ १४ ॥

चतुरास्यगुरुं धीरं चतुरं श्रीहयाननम् ।
करुणार्द्रकटाक्षाभ्यां कलिकल्मषखण्डनम् ॥ १५ ॥

खलौघदण्डनं शान्तं कमनीयतमं स्मर ।
चित्ररत्नोच्चमकुटं रत्नग्रैवेयरञ्चितम् ॥ १६ ॥

रत्नोद्यत्तिलकं रत्नकुण्डलद्वयमण्डितम् ।
सद्रत्नभुजकीर्तिभ्यां हृद्यांसद्वयमद्वयम् ॥ १७ ॥

रत्नहारसरैर्युक्तं रत्नयज्ञोपवीतिनम् ।
रत्नोज्ज्वलोत्तरीयं च रत्नमध्यविभूषितम् ॥ १८ ॥

रमणीयं रत्नकाञ्च्या रत्नकिङ्किणिराजितम् ।
रत्नोद्यत्कटिसूत्रेण बद्धविद्युत्प्रभाम्बरम् ॥ १९ ॥

रत्नाङ्गुलीयकं रत्नकङ्कणाङ्गदभास्वरम् ।
विचित्ररत्नोल्लसितवीरतोचितभूषणम् ॥ २० ॥

नवरत्नमयोत्तुङ्गरणत्कनकनूपुरम् ।
स्फुरद्रत्नचयोद्भासिक्वणत्पौरुटकिङ्किणिम् ॥ २१ ॥

रत्नमुद्राङ्गुलीयैश्च दीप्तपाददद्वयाङ्गुलिम् ।
तुलसीकुन्दमन्दारकुसुमैश्च सदाऽर्चितम् ॥ २२॥

रत्नमण्टपमध्यस्थं रत्नपद्मोपरि स्थितम् ।
रत्नोल्लसत्फणश्रेण्या छत्रायितफणीश्वरम् ॥ २३॥

चित्ररत्नमयच्छत्रचामरादैश्च सत्कृतम् ।
सप्तावरणदेवैश्च सहितं ते हितं स्मर ॥ २४॥

चतुर्दिक्षु चतुर्द्वारगतैश्चण्डजयादिभिः ।
द्वाःस्थैश्चक्रगदाहस्तैर्जुष्टमिष्टकरं स्मर ॥ २५॥

मध्वहृत्पद्ममध्यस्थं हृद्यदं बुद्धिशुद्धिदम् ।
सद्यो विजयदं सिद्धसाध्याराध्यपदं स्मर ॥ २६॥

तत्त्वानां मातृकाणां च वर्णानां चैव देवताः ।
शास्त्रोक्तवर्त्मना विष्णोरङ्गेष्वर्पय सादरम् ॥ २७॥

पञ्चाङ्गं वा षडङ्गं वा न्यासं कृत्वा पुनर्हरेः ।
संस्मृत्य चरणौ मन्त्राञ्जप प्रणवपूर्वकान् ॥ २८॥

पञ्चामृतैः शुद्धजलैः कलशस्थोदकैरपि ।
मन्त्रपूतैः स्नापयित्वा सपीठावरणाम्बरम् ॥ २९॥

अर्घ्यादैरुपचारैश्च तोषयित्वा जनार्दनम् ।
तुलसीमञ्जरीभिश्च पुष्पैश्च विविधैरपि ॥ ३०॥

आराध्य धूपदीपौ च दत्वा स्तुत्वा पुनर्हरिम् ।
सरसैः फलपक्वैश्च भक्ष्यभोज्यरसायनैः ॥ ३१॥

ससितैर्घृतसिक्तैश्च पायसैर्विविधैरपि ।
दध्योदनेन चित्रान्नैस्तर्पयाऽवरणान्वितम् ॥ ३२॥

दयार्द्रहृदयं भक्तवत्सलं पुरुषोत्तमम् ।
पुनर्गण्डूषाचमनमुखवस्त्रादिकं दिश ॥ ३३॥

कर्पूरखण्डसहितं ताम्बूलं च निवेदय ।
पुनर्धूपेन दीपेन चित्रैरारार्तिकैरपि ॥ ३४ ॥

मन्त्रपुष्पैः स्तवैर्गीतैर्नृत्यवादित्रपूर्वकैः ।
अर्चयित्वा नमस्कृत्य कुरु चान्ते प्रदक्षिणम् ॥ ३५ ॥

श्रिया च धरया चैव स्वरूपावरणैरपि ।
अनन्तब्रह्मवाय्वीशवीशैः शक्रादिकैः सुरैः ॥ ३६ ॥

कृताञ्जलिपुटैर्नित्यं परिवारतया स्थितैः ।
पीठदेवैश्च सहितमेवं कालत्रयेऽर्चय ॥ ३७ ॥

भक्तियुक्तिस्फूर्तिशक्तिकीर्त्यनार्तिधृतिस्मृतीः ।
विरक्तिभक्तिमुक्तीश्च सुखव्यक्तीश्च याचय ॥ ३८ ॥

कर्तारं चैव धर्तारं प्रवक्तारं हयाननम् ।
ध्यातुं गातुं श्रमं जेतुं वादिराजोऽकृत स्तवम् ॥ ३९ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

हयग्रीवध्यानप्रकरणम् समाप्तम्

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु